वलनबोधकम् । तत्रापमण्डलप्राच्या याम्या सौम्या च दिक् सदा । कदम्बभ्रमवृत्तं चेति” । अतो विक्षेपः कदम्बाभिमुखो भवति । ध्रुवाभिमुख्या क्रान्त्या सह कथं तस्य भिन्नदिक्कस्य योगवियोगावुचितौ । तयोर्यद्भिन्नदिक्त्वं तदायनवलनवशात् । अथ तद्गोलोपरि प्रदर्श्यते । यथोदितं गोलं विरचय्य क्रान्तिवृत्ते यद्ग्रहचिह्नं तस्मात् परितो नवतिभागान्तरेऽन्यत् त्रिज्यावृत्तं निवेश्यम् । अथ ग्रहचिह्नाद्ध्रुवोपरिगामि सूत्रं तस्मिन् वृत्ते यत्र लगति तत्कदम्बयोरन्तरस्य ज्या त्रिज्या स कर्णः । तयोर्वर्गान्तरपदं कोटिः । सा च यष्टिसंज्ञा । क्रान्त्यग्राद्विक्षेपः कदम्बाभिमुखः कर्णरूपः । तस्य कोटिरूपकरणायानुपातः । यदि त्रिज्याकर्णे यष्टिः कोटिस्तदा शरकर्णे का । फलं क्रान्तिसंस्कारयोग्यो विक्षेपो भवति । तेन संस्कृता क्रान्तिः स्फुटा । विक्षेपाग्रस्थस्य ग्रहस्य विषुवन्मण्डलस्य च यद्याम्योत्तरमन्तरं सा स्फुटा क्रान्तिरुच्यते अथानुकल्पेऽपीयमेव वासना । अत्र सत्रिराशिग्रहक्रान्तिज्या भुजस्थाने कल्पिता स भुजः । तद्द्युज्या यष्टिस्थाने कल्पिता सा कोटिः । तत्रापि त्रिज्या कर्ण इति सर्वमुपपन्नम्” प्रमि० । तत्रैव स्थानान्तरेऽप्युक्तम् ।

“नाड़िकामण्डलात् तिर्य्यगत्रापमः क्रान्तिवृत्तावधिः क्रान्तिवृत्ताच्छरः । क्षेपवृत्तावधिस्तिर्य्यगेवं स्फुटो नाड़िकावृत्तखेटान्तरालेऽपमः” मू० ।“क्रान्तिवृत्ते यत् स्फुटग्रहस्थानं तस्य नाडिकावृत्तात् तिर्य्यगन्तरं सा क्रान्तिः अथ विमण्डले च यत् ग्रहस्थानं तस्य क्रान्तिवृत्ताद्यत् तिर्य्यगन्तरं स विक्षेपः । अथ विमण्डलस्थग्रहस्य नाडीवृत्ताद्यत् तिर्य्यगन्तरं सा स्फुटा क्रान्तिः” प्रमि० ।

२सामवेदविहिते यज्ञभेदे । “इषुवज्रौ सामवेदे विहितौ” सि०कौ० । इषुप्रकारः स्थूला० कन् । इषुकः शरप्रकारे

**इषुकामशमी** स्त्री पुरीभेदे “पूर्व्वेषुकामशमी” सि०कौ०।

**इषुकार** पु० इषुं करोति कृ—अण् उप० । बाणकारके शिल्पिभेदे “पिङ्गला कुररः सर्पः सारङ्गोऽन्वेषणं विना। इषुकारः कुमारी च षडेते गुरवो मम” बौद्धेनोक्तं समर्थयितुं पिङ्गलादीनां यथोपदेशकारित्वात् गुरुत्वं तथा वर्णितम् यथा ।“आशा बलवती राजन् ! नैराश्यं परमं शरमं सुखम् । आशां निराशां कृत्वा तु सुखं स्वपिति पिङ्गला । सामिषं कुररं दृष्ट्वा बध्यमानं निरामिषैः । आमिषस्य परित्यागात् कुररः सुखमेधते । गृहारम्भो हि दुःखाय न सुखाय कदाचन । सर्पः परकृतं वेश्म प्रविश्य सुखमेधते । सुखं जीवन्ति मुनयो भैक्ष्यवृत्तिसमाश्रिताः । अयत्नेनैव जीवन्ति सारङ्गा इव पक्षिणः । इषुकारो नरः कश्चिदिषावासक्तमानसः । समीपेनापि गच्छन्तं राजानं नावबुद्धवान्”बहूनां कलहो नित्यं द्वयोः सङ्कथनं ध्रुवम् । “एकाकी विचरिष्यामि कुमारीशङ्खको यथा” भा०शा० प० अ० १७८ इषुकृदादयोऽप्यत्र ।

**इषुकृत** त्रि० इषुरिव शीघ्रगामी ऋजुगामी वा कृतः । बाणतुल्यं शीघ्रगामितया ऋजुगामितया च कृते । “श्रिये पूषन्निषुकृतेव देवा नासत्या”ऋ०१८४,३ । इषुकृतेव इवशब्द एवार्थे । आजिधावनाय इषुवच्छीघ्रऋजुगामिनौ कृताविव सन्तौ” भा० इषुकृता इव नासत्या इत्यादौ सर्वत्र छान्दस आ । एतेन इषुकृच्छब्दस्योदाहरणतया एतस्या ऋच उपन्यासः प्रमादिक एव ।

**इषुध** शरधारणे कण्ड्वा प०अक०सेट् । इषुध्यति ऐषुध्यीत् इषुध्यिता-इषुधिता । याच्ञायामपि “विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसि” ऋ०६,५०,१ । पतिं वो अघ्न्यानां धेनूनामिषुध्य” ऋ० ८,५८,२ । भावे अ । इषुध्या प्रार्थनायां स्त्री । “दिवोवास्तोष्वसुरस्य वीरैरिषुध्येव मरुतो रोदस्योः”ऋ०१,१२२,१ । उण् इषध्यु प्रार्थके “इषध्यव ऋतसापः पुरन्धीः” ऋ०५,४१,६ ।

**इषुधर** पु० इषुं धरति धृ—अच् ६त० । बाणधरे इषुभृदादयोऽप्यत्र । “यशांसि सर्वेषुभृतां निरास्थत्” भट्टिः ।

**इषुधि** पुं स्त्री० इषवो धीयन्तेऽत्र धा-कि इषुध-इन् यलोपो वा । बाणाधारे बाणधारके वा तूणे । स्त्रीत्वे “धनुर्गाण्डीवमादाय तथाऽक्षय्ये महेषुधी” भा०व० । ३८अ०। निसर्वमेन इषुधीरसक्तः” ऋ०१,३३,३ । पुंस्त्वे “बद्धाऽऽक्षय्यौ महेषुधी”रामा०।“बह्वीनां पिता बहुरस्य पुत्रश्चिश्चाकृणोति समनावगत्य” । “इषुधिः सङ्काः पृतनाश्च” ऋ० ६,७५,५ । “बह्व इषवो धीयन्ते इषूणां निधानत्वात् “इषुधिरिषूणां निधानम्” यास्कः”भा०।

**इषुप** पु० इषुं पिबति पा०पाने क उप०प० । असुरभेदे सहि अंशावतारे नग्नजिन्नामा राजासीत् यथाह भा० आ०६७अ०“इषुपोनाम यस्तेषामसुराणां बलाधिकः । नग्नजिन्नाम राजासीत् भुवि विख्यातविक्रमः”।

**इषुपुङ्खा** स्त्री इषोः पुङ्खमिव पुष्पमस्याः । शरपुङ्खावृक्षे ।

**इषुपुष्पा** स्त्री इषुरिव पुष्पमस्याः । शरपुष्पायाम् ।

**इषुमत्** पु० इषवः सन्त्यस्य प्राशस्त्येन मतुप् । प्रशस्तबाणधरे । “इषुमति रघुसिंहे दन्दशूकान् जिघांसौ” भट्टिः ।